Gyanshauryam, International Scientific Refereed Research Journal
© 2020 GISRRJ | Volume 3 | Issue 1 | ISSN : 2582-0095

# व्यावसायिकशिक्षा



**खेमनारायण रेग्मी**
**शोधच्छात्रः, राष्ट्रियसंस्कृतसंस्थानम्,**
**(नवदेहली) गुरुवायूर् परिसरः**

**शोधालेखसारः** – जीवने निर्देशनस्य स्थानमत्यन्तं महत्त्वपूर्णमस्ति। तद्दृष्ट्या निर्देशनन्तावत्प्राचीनमस्ति,यावज्जीवनम्। प्राक् सभ्यतासु निर्देशनं कुत्र-कुत्रचित् केनापि रूपेण सर्वेव लभमानमस्ति।

**मुख्यशब्दः** – व्यावसायिकशिक्षा, शिक्षनितिः।

---

स्वतन्त्रताप्राप्तेः प्राक् नो देशस्स्वावश्यकतायाः प्रत्येकं वस्तुनः कृते विदेशानां मुखमवलोकते स्म। जीवनोपयोगिनस्साधारणवस्तुनोऽपि समुपलब्धिरत्र नासीत्। किन्तु पूर्वं २० वर्षेषु औद्योगिकक्षेत्रेषु श्लाघनायो विकासोऽभूत्। अद्यत्वे वयं कस्मैचिद्वस्तुविशेषायेतरेषामपेक्षां न कुर्महे। अन्ताराष्ट्रियक्षेत्रेषु उद्योगं दृष्ट्वा सुविकसितदेशो विशिष्टवस्तुन उत्पादने संलग्नोऽस्ति। स्थूलस्य वस्तुनो व्यवहारे ह्रासः संलक्ष्यते किन्तु पक्षान्तरे वस्तूनामुत्पादनमेधते। एतस्यैकमात्रं कारणंव्यावसायिकरुचि-क्षमता-शिक्षा च।

## अध्ययनस्य पृष्ठभूमिः

शिक्षानीति १९८६ इत्यस्य सन्दर्भे शैक्षिकव्यावसायिकनिर्देशनयोः महत्त्वं भूयो भूय एधते। कदाचित् प्रथमवारं सम्पूर्णराष्ट्राय एकसमानव्यवस्थायाः कल्पना कृतास्ति राष्ट्रियनिर्देशनस्य महन्महत्त्वं वर्त्तते। भारतीयविचारधारानुसारेण “मनुष्यः” स्वयं एका मूल्यवती सम्पत्,अमूल्यं संसाधनमप्यस्ति। आवश्यकी कथासौ तत्परिपालनं गतिशीलं संवेदनशीलञ्च भवेत् एवञ्च सावधानं तत् कुर्यात्। प्रत्येकं नरस्य स्वविशिष्टव्यक्तित्वं भवति,जन्मनः मृत्युपर्यन्तम्,जीवने प्रतिसमयं तत्समस्या उत्पद्यन्ते,तदावश्यकतामपि भजते। विकासस्य जटिलायां गतिशीलप्रक्रियायां शिक्षा स्वोत्प्रेरकयोगदानं दद्यात्। एतदर्थं महतावधानेन योजना निर्मातव्या,एवञ्च पूर्णावेगेन सह तत्सन्निवेशस्यावश्यकता वर्तते।

अद्यत्वे भारतराजनैतिकसामाजिकयोर्दृष्ट्या एवमतिक्रमति परम्परागतमूल्यानां ह्रासस्य विपदागतमासीत्। समाजवादधर्मनिरपेक्षतालोकतन्त्रव्यावसायिक-नैतिकतालक्ष्यप्राप्तौ धारावहिकरीत्या बाधा आयान्ति।

ग्रामनगरयोर्मध्ये भेदभावं न्यूनीकर्त्तुं तथा च ग्रामीणक्षेत्रेषु नियुक्तेः विविधव्यापकयोस्साधनोपलब्ध्यर्थमावश्यकमस्ति। आगामिदशवर्षेषु नवीनोत्तेजना-समस्याभ्याञ्च सार्धमभूतपूर्वावसरमपि दद्मः। तदुत्तेजनाया नाशाय,तदवसरस्य लाभाय मानवसंसाधनं नूत्नं रीत्या विकसितं भवेत्। आगंस्यमानेभ्यो वंशेभ्य आवश्यकं भविष्यति यत् अमी नवीनविचाराणां सततसृजनशीलताभिस्सह आत्मसात् कुर्यात्। तद्वंशेषु मानवीयमूल्यं सामाजिकन्यायं प्रति गभीरप्रबद्धता प्रतिष्ठिता भवेत्।नव्यशिक्षानीतौ व्यावसायिककरणोपरि विशेषबलं दत्तमस्ति। एतद्दृष्ट्या शैक्षिकस्य व्यावसायिकस्य च निर्देशनोपरि तथा चाधिकं ध्यानं दातव्यम्। शिक्षायां व्यावसायिककरणस्य किं रूपं भविष्यति? एतस्य स्वरूपविवरणमित्थमस्ति

शिक्षायाः प्रस्तावितपुनर्गठने व्यवस्थितसुनियोजितयोर्व्यावसायिकशिक्षाः कार्यक्रमस्य दृढरीत्या क्रियान्वयनं महदावश्यकमस्ति। येन व्यक्तीनां नियुक्तिप्राप्तये क्षमतायाः वर्धनं भविष्यति। अद्यत्वे कुशलकर्मचारिणां निवेदनं यत् आपूर्तेरुभयत्रासन्तुलनं,तस्य समाप्तिर्भवेत्। एवं विद्यार्थिभ्यरेक: वैकल्पिकः पन्थाः लप्स्यते। यत् समयमेनं विना कस्याश्चित् रुचेरुद्देश्यस्य वोच्चशिक्षायाः पठनङ्क्रियते।

व्यावसायिकशिक्षा स्वशिक्षायाः विशिष्टधाराऽसौ भविष्यति,यस्या उद्देश्यः केषुचित्क्षेत्रेषु चितेभ्यः कर्मनियुक्तेभ्यः विद्यार्थिनां निर्माणङ्करणीयम्। पन्था अयं साधारणतः माध्यमिकशिक्षाया परं दास्यते किन्तु योजनैषा नमनीया करणीया,येन अष्टमकक्ष्यानन्तरमपि विद्यार्थिनः पन्थानं स्वीकर्तुं शक्याः भवेयुरिति। औद्योगिकप्रशिक्षणसंस्थानेऽपि महत्या व्यावसायिकशिक्षायाश्शैल्यनुसारेण चलिष्यति येन तत्र प्राप्तसौलभ्यस्य सम्पूर्णलाभो भवेदेव।

व्यावसायिकपाठ्यक्रमे स्नातकेभ्यश्चैतादृशोऽवसरो दास्यते यस्य फलस्वरूपं ते पूर्वं निर्धारितनियमानुसारेण व्यावसायिकविकासं कर्त्तुं शक्यास्स्युः,व्यवसाय-उन्नतिर्यथा लभ्यताम्,सामान्यप्रविधावुच्चस्तरीयव्यवसायविभागे च प्रवेशो लभ्येत।उच्चशिक्षा,निर्दिष्टरीत्या शिक्षाप्तये योग्यतासन्निवेशेभ्यः प्रत्येकं छात्रेभ्यः सम्यक् स्ववसरस्य प्रदानाय व्यवस्था कार्या एवञ्च

एकं क्षेत्रं गत्वाध्ययनसौविध्यं परिकल्पनीयम्। विश्वविद्यालयानामुच्चशिक्षानाञ्च संस्थान्तरे सार्वदेशिकस्वरूपोपरि बलं दास्यते।

यद्यपि प्रविधिशिक्षा प्रबन्धशिक्षा चान्यया धारया चलतस्तथापि तदुभयोः घनिष्ठस्सम्बन्धस्य योगदानोद्देश्यस्य च ध्यानं ददत् उभयोर्विषये एकविचारस्यावश्यकतास्ति। प्रविधिप्रबन्धयोश्च शिक्षायाः पुनर्गठनकृते समते नव्यवर्षस्यारम्भे यादृशी परिस्थितिस्सम्भाव्यते,तद्ध्यानं दानीयम्। अर्थव्यवस्थायाम्,सामाजिकवातावरणे,उत्पादने प्रबन्धकीयप्रक्रियायाञ्च सम्भावितपरिवर्त्तनम्,ज्ञाने महता वेगेन भवत् प्रसारणं तथा च विज्ञाने प्रौद्योगिक्याञ्च भविष्यती प्रगतिः,तत्सन्दर्भे द्रष्टव्यमस्ति। अर्थव्यवस्थया सार्धमाधारसदृशरीत्या एवञ्च सेवाक्षेत्रैस्सहासङ्गठित-ग्रामीणक्षेत्रस्यापि,नव्यप्रविधेः प्रबन्धकीयजनशक्तेश्च महदावश्यकताऽस्ति। सर्वकारैः ध्यानं दास्यते।कुत इति चेत् सङ्गणकं महत्त्वपूर्णं सर्वव्यापकसाधनञ्चाभूत्। अतः सङ्गणकस्य विषयेऽल्पानल्पधारणा तथा हि तत्प्रयोगे प्रशिक्षणं व्यावसायिकशिक्षायाः अङ्गत्वेन कारयिष्यते। सङ्गणकसाक्षरतायाः कार्यक्रमाः विद्यालयस्तरेषु हि गरीयस्या प्रशंसया योजयिष्यन्ते।

अद्यत्वे आधुनिकयुगेऽस्मिन् यत्र व्यावसायिकप्रतिस्मपर्धा स्वान्तिमबिन्दावस्ति। व्यावसायिकशिक्षाया अनिवार्यत्वमनुभूयते। एवं नास्ति यदाधुनिकयुगे एव व्यावसायिकशिक्षायां बलं दीयते। यदि वयं नः शिक्षाया अतीतमवलोकामहे चेज्ज्ञायते जगद्गुरु नाम्ना प्रथितो देशो नः,येन विश्वस्य मार्गदर्शनमकारि,अद्य पाश्चात्यदेशानन्वस्ति। तथा च तद् वैदिककालो बौद्धकालो वा ज्ञान-विज्ञानादिक्षेत्रेषु स्वर्णिमयुग आसीत्,अद्यत्वे अस्माभिःव्यवसाये निपुणताहेतु –विदेशे शिक्षाग्रहणङ्क्रियते। किञ्च तत्कारणम्? येन नः पतनमभूत्। स्थूलदृष्ट्यावलोक्यते चेत् स्पष्टीयते। आधिक्येन च संस्कृतीनामाक्रमणं ह्यस्य कारणमेवञ्च सांस्कृतिकानां तुलनायामत्यधिक-प्रभावाङ्ग्रेजीशासने पतितम्। येन शिक्षामाध्यमेन प्राचीनकला-विज्ञान-भाषा-व्यवसायानाञ्च प्रति घृणाभावः उत्पादितः। वयमद्येत्थं पथिकेन सदृशा नद्या धारायामवतिष्ठामहे,येषां सर्वमपि निमज्जितमस्ति। एवञ्च नदीपारान्तराय कस्यचित् समर्थनस्य चिह्नमवलोकते।

युगोऽसाववर्त्तत यत् विश्वस्य नैके भूभागनिवासिनस्स्वप्राथमिकावश्यकतानां पूर्णताहेतोरसभ्यास्तथा वन्यजीवनेन कालं यापयन्ति स्म। तदा भारतवर्षे एकैतादृश्याः शिक्षाप्रणाल्याः जन्माभूत्,यद्व्यक्तेस्सर्वाङ्गीणविकाससामाजिकस्याथवा राष्ट्रिय-प्रगतेस्तथा सभ्यताया अथवा संस्कृतेरुत्थानायानिवार्यरूपेणावगम्यते।डॉ.एफ.डब्लू थामसमहाशयोऽस्योल्लेखं कुर्वन्नाह— एतादृशो देशो नास्ति यत्र ज्ञानं प्रति प्रेम्णोऽतिप्राचीनकालादेवारम्भमाणं भवेदथवा येन एतावान् स्थायीप्रभावोऽथवा शक्तिशालीप्रभाव उत्पादितः भवेत्। प्राचीनभारते शिक्षायाः केन्द्रबिन्दुः

धर्मोऽवर्त्तत। शिक्षाया लक्ष्यं मोक्षप्राप्तिरेवासीत्। पाठ्यक्रमः चतुर्षु पुरुषार्थेषु नाम धर्मार्थकाममोक्षेष्वाधारितोऽविद्यत अर्थात् धर्मशास्त्रम्,अर्थशास्त्रम्,कामशास्त्रम् (व्यावसायिकशास्त्रम्),मोक्षशास्त्रम्,इत्यादीनि शास्त्राणि समध्याप्यन्ते स्म। कर्मानुसारेण "वर्ण" एवञ्चाय्वनुसारेण "आश्रमः" इत्यस्य सिद्धान्तस्यानुसारेण समाजस्य प्रत्येकं व्यक्तये पुरुषार्थचतुष्टयस्य पालनावसरो दीयते स्म। ब्रह्मचर्येऽथवा वानप्रस्थाश्रमे धर्मपालनम्,एवञ्च गृहस्थाश्रमे धर्मार्थकामाः,सन्यासाश्रमे मोक्षः,तत्प्राप्तये विधानमकार्षीत्। शिक्षा तल्लक्ष्याणि स्वीकृत्याग्रगामिनी समभूत्। समाने न आशारहित आसीत् एवञ्च न तन्मूल्यानां पतनम्। त्याग-समर्पण-सेवा-परोपकारादिमूल्यानां सृजनमाश्रमाद्भवति स्म। वेदोऽथवा धर्मशिक्षाया अन्तरेण शिल्पस्य,सैनिकशिक्षायाः,चिकित्सायाः,ज्योतिषविषयस्य विभिन्नव्यवसायानां ज्ञानं दीयते स्म।

उच्चशिक्षाक्षेत्रेऽन्ताराष्ट्रियाख्याति प्राप्तो विश्वविद्यालयास्स्थापिताः येषु इमे आसन्– तक्षशिला,विक्रमशिला,नालन्दा अथवा बल्लभी इत्यादिनाम्नोल्लेखनीयम्। अमीषु विश्वविद्यालयेषु अध्येतुं विश्वस्य दिशो दिशो विद्यार्थीन् आयन्त।भारतदेशः द्वादशतमे वर्षे उच्चशिक्षायै शिखरमलभत यस्योल्लेखः चीनदेशपरिव्राजकेनाकारि। स च महाशयः "ह्वेनसाङ्ग" एवञ्च आईसिंग महाशयस्य लेखेषु समुपलभ्यन्ते। फ्रांसीसी यात्री फाह्यानमहोदयैरुच्चशिक्षाया महतः गुणस्य विषये सम्यगुपवर्णितम्। त्रयोदशतमे वर्षे "मुस्लिम" इति जनानामाक्रान्तेन नालन्दाविश्वविद्यालयेन सार्धं भारतस्य शिक्षामितस्ततोऽकार्षुः,संसारमवलोकमानाः जनाः यादृशरीत्या विश्वविद्यालयमिमं पश्यन्ति। एतच्च विश्वविद्यालयः स्ववैभवं परित्यजन्नस्ति।

ततः परं भारतेऽङ्ग्रेजजनानामाधिपत्यं विस्तृतम्। अमी च महान्तः कूटनीतिज्ञाः अथवा चतुरा अवर्त्तन्त। ते च स्वलाभाय भारतीयशिक्षायाः परिवर्त्तनमकृषत,पुनरपि व्यावसायिकशिक्षायै समये समये प्रोत्साहनमलभत। भारते अङ्ग्रेजजनैस्सह इसाईसङ्गठनस्यागमनमभूत्,ये चास्मद् दारिद्यम् अज्ञानतत्वं ,उच्चनीचभावेन सन्निविष्टस्समाजः,एतत्सर्वं स्वपक्षं प्रति आकर्षयन्ति स्म। प्रत्यक्षेण परोक्षेण वा रूपेण धर्मप्रचारे शिक्षाप्रचारे चेमे रताः तदनन्तरं ब्रिटिशसर्वकारेणापि तत्परामर्शेण शिक्षानीतिर्निर्मिता यावद् व्यावसायिकशिक्षायाः कथास्ति,वयं वैदिकयुगात् अङ्ग्रेजीकालं भारतीयशिक्षायोगं यावत् पश्यामः। यत्र वैदिकयुगे जीविकोपार्जनाय शिक्षाव्यवस्थासीत्,यस्यान्तर्गतवैदिककाले छात्रेभ्य एतादृशं व्यावहारिकज्ञानं प्रदीयते स्म। अमी च भाविजीवनं सुचारुरूपेण चालने समर्थाः स्युः। जीवनोपयोगिन उद्यमाः यथा-

पशुपालनम्,कृषिः,चिकित्सा,व्यवसायः,कलादीनाञ्च प्रशिक्षणं दीयते स्म। एतादृशा व्यवसायेन छात्रेषु सामाजिककुशलत्वमभिवर्धते।

तथा चेमे गृहस्थाश्रमे स्वपरिवारजनानां भरणपोषणे सक्षमा अभूवन्। बौद्धकालेऽपि छात्राणां जीविकोपार्जनहेतवे व्यावसायिकशिक्षायै महत्त्वं दीयते स्म। बौद्धशिक्षानिवृत्तिप्रधानमासीत्,एतस्य मुख्योद्देश्यः जीवने निर्वाणप्राप्तिरेवावर्त्तत। अतश्शिक्षायां सामनेर महाशयः बौद्धधर्मशास्त्राध्ययनमकरोत्,परन्तु अयमर्थो नासीत् यत् तत्समये जीवनोपयोगिनी शिक्षाविरहितासीत्। मौर्यकालः,गुप्तकालश्च भारतवर्षस्य "स्वर्णयुगम्" नाम्ना प्रथितावास्ताम्। एतत्काले साहित्यदर्शनकलाव्यापार-कृषिसैनिकादिक्षेत्रेषु भारतदेशस्सर्वोत्तमशिखरेऽविद्यत। मुस्लिमकाले शिक्षाव्यावसायिकः न्यूनः,धार्मिका अधिका आसन्। पुनरपि नैकैः मुस्लिमशासकैः ललितकलाहस्तकला-वास्तुकला यादृश्यै व्यावसायिकशिक्षायै च पर्याप्तप्रोत्साहनं दत्तम्। मुस्लिमकाले हस्तदन्तादिभिः कलाभिः कौशलसम्बन्धिकार्यमत्यन्तोच्च-शिल्पकलारीत्या कृतमासीत्।

यद्यप्येतादृश्याः कलायाश्शिक्षाप्रदानाय काप्यौपचारिकसंस्था नासन् परन्त्वासु कलासु दक्षकर्मकरैस्सह कार्यङ्कृत्वा छात्रगणोऽस्याः कलायाः प्रशिक्षणं प्राप्तमासीत्। मुस्लिमकालानन्तरमङ्ग्रेजजनानामधिकारः भारतवर्षे सर्वत्र दरीदृश्यते स्म। 1833तमे वर्षे वैदेशिकोऽयम् लॉर्ड मैकाले महाशयो भारतमागतः एवञ्च 1835तमे वर्षे पाश्चात्यशिक्षाया परामर्शो दत्तः। यथा – मैकाले महाशयस्य विवरणपत्रमिति नाम्ना निगद्यते स्म। शिक्षारूपेणाङ्ग्रेजजनानां पक्षं स्वीकुर्वता मैकाले महोदयेन चोक्तम् – भारतवर्षे अङ्ग्रेजीभाषा सत्ताधिकारिभिर्भाष्यमाणा भाषासौ,एतत्तावत् सर्वकारीयोपाधिना विभूषितस्योच्चवर्गस्य भारतीयैरुच्यते। एतत् सर्वं पूर्वक्षेत्रे व्यापारस्य भाषा इति नाम्ना प्रथिता। मैकाले महोदयस्य शिक्षानीतौ व्यावसायिकशिक्षाया विशेषकथा कापि नावर्त्तत।

बुड डिस्पैच 1854 तमे वर्षे व्यावसायिकशिक्षाया महत्त्वमपि न दत्तम्। फरवरीमासस्य तृतायदिनाङ्के 1852 तमे वर्षे भारतीयशिक्षायोगस्य नियुक्तिरभूत् यस्याध्यक्षो विलियम हण्डरमहोदयोऽभूत्। अमुनायोगेन माध्यमिकशिक्षाया पाठ्यक्रमो द्विधा विभाजितः इत्युक्त्वायोगेन शिक्षाया एकाकीत्वं निराकृत्य शिक्षायाः नियुक्त्युन्मुखीकरणं कारितम्। विंशतिशताब्द्यां भारतदेशे लार्ड कर्जनमहाशयः राज्याधिपतिर्भूत्वागतः,येन शिक्षाव्यस्थायां कस्मिंश्चित् विषयेऽपि प्रभावो न प्रादर्शि।

1902 तमे वर्षे भारतीयविश्वविद्यालयीयायोगस्याध्यक्षः सर थामस रैले महोदयोऽविद्यत। एतेन सामान्यविश्वविद्यालयीयशिक्षायां महान् प्रभावो दत्तः न तु व्यावसायिकशिक्षायाम्। ततः पश्चात्

भारतस्य नेतृभिश्शिक्षाविद्भिर्भारतीय-संस्कृताधारितशिक्षाया निवेदनमकारि,यस्य इतरावेदनैस्सह व्यावसायिकशिक्षोपरि विशेषेण बलमददुस्ते।

1913 तमे वर्षे शिक्षानीतिसम्बन्धीयसर्वकारीयप्रस्तावो निकषाभूत् यत्र उच्चशिक्षान्तर्गतौद्योगिकमहत्त्वस्य विषयाः पाठ्यक्रमे सन्निविष्टाः तथा चानुसन्धानं चिकीर्षूणां कृते सौविध्यं परिकल्पयितुं संस्तुतिरपि कृता।

कलकत्ताविश्वविद्यालयायोगेन 1917 तः 19 तमवर्षाणि यावत् उच्चशिक्षाया कारणात् इण्टर इहैव कलायाः,विज्ञानस्य,चिकित्सायाः,अभियान्त्रिकशिक्षायाः,कृषि तथा वाणिज्यशिक्षणमित्यादीनाञ्च व्यवस्थाङ्कर्तु परामर्शो दत्तः।

स्नातकानामेधमानाया निक्तेस्समाप्तये विश्वविद्यालये औद्यौगिकशिक्षाया पाठ्यक्रमं चालयितुं वकालहटगिसमित्यादिभिः प्रयत्नः कृतः। तदनुसारेण यत् विश्वविद्यालयेषु नियुक्तिकार्यालयान् स्थापयेयुर्येन स्नातकेभ्यः योग्यतानुसारेण नियुक्तिप्राप्तये सहायको भवेत्।

1921तमे वर्षे “वुडरिपोर्ट” नाम्ना अन्येषु प्रस्ताविकेष्वेकः प्रस्तावबोर्ड एतेन भारतसर्वकारद्वारा एधमानया विनियुक्तियोजनादृष्ट्या शिक्षायाः पुनर्गठनङ्कृत्वा तथा उच्चतममाध्यमिकस्तरे प्रविधिशिक्षाया अथवा व्यावसायिकशिक्षायाः कृते एकया समित्या भाविष्यते तन्निमित्तं परामर्शे दत्तः। “वुडरिपोर्ट” इत्यनुसारेण व्यावसायिकशिक्षाया विस्तारो देशौद्योगिकविकासाद्भिन्नो न भवेत्। सामान्यव्यावसायिकशिक्षयोः पूर्णरूपेण भेदोऽस्तीत्येवं न मन्तव्यमपितु निरन्तरं प्रचल्यमाना प्रक्रिया,अस्याः पूर्वं परं वा सीमानत्वेन मन्तव्यम्। व्यावसायिकविद्यालयं प्रति विषयस्योद्भवोऽव्यवसायिकविद्यालये भवति। व्यावसायिकशिक्षोपयुक्त-सामान्यशिक्षाधारिता भवेत्। अष्टम्याः कक्ष्यायाः परं व्यावसायिकी शिक्षा लभ्यताम्। नियुक्तये संलग्नेभ्यो युवकेभ्यस्सततं शिक्षाप्रदानाय अंशकालिका विद्यालयास्समुद्घाटनीयाः। सर्वकारेण व्यावसायिकप्रशिक्षणसम्प्राप्तये महाविद्यालया उद्घाटनीयाः। प्रविधिस्तथा व्यावसायिकशिक्षारूपेण सूचनासौ सर्वोत्तमासीत्,अस्यास्सूचनायाः परं भारतीयप्रविधिशिक्षापरिषद् निरमायि।

1944 तमे वर्षे सार्जेन्ट योजनागता। यत्र प्रविधेश्शिक्षायै व्यावसायिकशिक्षायै वा परामर्शो दत्तः। यथा- उद्योगस्य व्यापारस्य वा युद्धात्परमावश्यकतानां पूर्णतार्थं सर्वेषु स्तरेषु प्रविधिशिक्षायाः प्रभाविप्रणाल्याः स्थापनाकरणाय महत्त्यावश्यकतास्त्यथवा प्रविधिशिक्षोपरि 10 Crore

वार्षिकानुमितं व्ययः भवेत् एवं छात्रेभ्यः व्यवसायचयने सहाय्यार्थमथवा परामर्शार्थं नियुक्तिपरिषत् उद्घाटिता भवेत्।

तत्र राधाकृष्णन आयोगेन 1948-49 तमे वर्षे व्यावसायिकशिक्षायां विशेषबलं न दत्तमपितु धार्मिकशिक्षाया अथवोच्चशिक्षायाः समर्थनमनेनायोगेनाकारि। एवं मुदालियर कमिशनर नाम्ना केनचिदायोगेन 1952-53 तमे  वर्षे व्यावसायिकशिक्षायां प्रविधिशिक्षायां वा तदुपरि महद्बलं प्रदाय पृथक् विद्यालया यथा उद्घाटयिष्यन्ते तदर्थञ्चोक्तमासीत्। अनन्तरं कोठारी आयोगेन 1964-66 तमे वर्षाभ्यन्तरे व्यावसायिकप्रविधावभियन्त्रीयां शिक्षायां विशेषतया महद्बलं दत्तम्। आयोगेन व्यावसायिकपाठ्यक्रमाणां नियुक्तिप्रगत्यर्थम्,प्रविधिपाठ्यक्रमेषु संशोधनाय तथा चाभियन्त्रीयपाठ्यक्रमेषु प्रत्यक्षतया प्रायोगिककार्येषु महन्महत्त्वञ्च दातुं सूचना दत्ता तथा च कालान्तरे काभिश्चित् समितिभिरपि व्यावसायिकशिक्षायां बलं दीयते स्म। किन्तु व्यावसायिकशिक्षादः रूपस्य धारणं नाकार्षीत्,यदपेक्षा कृता नैकजनैः। कुतः इति चेत् यदा भारतवर्षं स्वतन्त्रतयाऽभूत् तदा भारतीयजनानामाशावर्त्तत यत भारतवर्षस्य स्वशिक्षानीतिर्भविष्यत्येवञ्चास्माभिः पुरा ज्ञानगोरवस्य पुनस्संस्थापनङ्क्रियेत। किञ्च दौर्भाग्यात् अङ्ग्रेजीशिक्षालभमानैः जनैः गान्धीविनोबामहाशयैः शिक्षायाः प्रतिकृतिं न स्वीकृत्य मैकालेमहाशयस्य च प्रतिकृतिः भारतवर्षे प्राचलत्। विज्ञानवादस्याधुनिककरणस्य वा मिथ्या विश्वासं दत्त्वा भारतीयजनमानसस्य भावनया सार्धं मिथ्या क्रियाभूत् यस्य परिणामकारणान्नवीनागन्तारो वंशावलीविशेषा भोगङ्कुर्वते।

प्रत्येकं देशस्यावश्यकता परिस्थितयश्च अन्यस्माद्देशाद् भिन्नाः भवन्ति। आमेरिकादेशे यन्त्राणां प्रयोगो निरन्तरमेधमानोऽस्ति। किमर्थमिति चेत्तत्र जनसंख्यान्यूनास्ति किन्तु प्रयोगोऽसौ भारतवर्षे सफलीभवितुं नार्हति। यदि महतां यन्त्राणां प्रयोग एधते तर्हि निरुद्योगिन एधन्ते। यतो हि जनसङ्ख्या नो महत्यस्ति। सूचनाप्रद्यौगिकस्य प्रयोगः विज्ञानरक्षा तथेतरेषु महत्त्वपूर्णक्षेत्रेषु लाभदायकत्वेन च भवति। किञ्च यदि लघुषु कार्येषु तत्प्रयोगो भविष्यति चेत् यूनां भविष्यञ्चान्धकारमञ्च भवेत्। अतश्शिक्षाया वैदेशिकीं नो नीतिस्स्वीकार्या। येन कृषि-क्षुद्रसरलगृहोद्योगादिभारतीयव्यवसायपुरस्सरं पदोन्नतीनां कृते महत्त्वं लप्स्यते। अतो निर्देशनसेवा प्रारब्धा,यस्य विवरणं निम्नोल्लिखितं

जीवने निर्देशनस्य स्थानमत्यन्तं महत्त्वपूर्णमस्ति। तद्दृष्ट्या निर्देशनन्तावत्प्राचीनमस्ति,यावज्जीवनम्। प्राक् सभ्यतासु निर्देशनं कुत्र-कुत्रचित् केनापि रूपेण सर्वैव लभमानमस्ति।

## परिशीलितग्रन्थसूचिः


1. Study the Impact of Skill & Vocational Education In The Socio-Economic Development of Rural Youth Living In The Backward District Of Madhya Pradesh – Research Thesis
2. Vocational Education and Training in Europe
3. **संस्कृतसाहित्येतिहासः ।**
4. **संस्कृतशिक्षानीतिः १९५६-५७ ।**
5. Trends in vocational Education and Training Research, Vol.II
6. Academy of Entrepreneurship Journal
7. Education : Vocational Training Dominates Slovene Education Priorities
8. Retention of Vocational Education Graduates in
9. Public Higher Education